# ভগবতীপদ্যপুষ্পাংজলিস্তোত্রং অথবা মহিষাসুরমর্দিনিস্তোত্রম্

{॥ ভগবতীপদ্যপুষ্পাংজলিস্তোত্রং অথবা মহিষাসুরমর্দিনিস্তোত্রম্ ॥}

শ্রী ভগবত্যৈ নমঃ ॥

ভগবতি ভগবৎপদপঙ্কজং ভ্রমরভূতসুরাসুরসেবিতম্ ।
সুজনমানসহংসপরিস্তুতং কমলযাঽমলযা নিভৃতং ভজে ॥ ১॥

তে উভে অভিবন্দেঽহং বিঘ্নেশকুলদৈবতে ।
নরনাগাননস্ত্বেকো নরসিংহ নমোঽস্তুতে ॥ ২॥

হরিগুরুপদপদ্মং শুদ্ধপদ্মেঽনুরাগাদ্-
বিগতপরমভাগে সন্নিধাযাদরেণ ।
তদনুচরি করোমি প্রীতযে ভক্তিভাজাং
ভগবতি পদপদ্মে পদ্যপুষ্পাঞ্জলিং তে ॥ ৩॥

কেনৈতে রচিতাঃ কুতো ন নিহিতাঃ শুম্ভাদযো দুর্মদাঃ
কেনৈতে তব পালিতা ইতি হি তত্ প্রশ্নে কিমাচক্ষ্মহে ।
ব্রহ্মাদ্যা অপি শংকিতাঃ স্ববিষযে যস্যাঃ প্রসাদাবধি
প্রীতা সা মহিষাসুরপ্রমথিনী ছিন্দ্যাদবদ্যানি মে ॥ ৪॥

পাতু শ্রীস্তু চতুর্ভুজা কিমু চতুর্বাহোর্মহৌজান্ভুজান্

ধত্তেঽষ্টাদশধা হি কারণগুণাঃ কার্যে গুণারম্ভকাঃ ।

সত্যং দিক্পতিদন্তিসংখ্যভুজভৃচ্ছম্ভুঃ স্বয়ম্ভূঃ স্বয়ং

ধামৈকপ্রতিপত্তয়ে কিমথবা পাতুং দশাষ্টৌ দিশঃ ॥ ৫॥

প্রীত্যাঽষ্টাদশসংমিতেষু যুগপদ্দ্বীপেষু দাতুং বরান্

ত্রাতুং বা ভয়তো বিভর্ষি ভগবত্যষ্টাদশৈতান্ ভুজান্ ।

যদ্বাঽষ্টাদশধা ভুজাংস্তু বিভৃতঃ কালী সরস্বত্যুভে

মীলিত্বৈকমিহানয়োঃ প্রথয়িতুং সা ত্বং রমে রক্ষ মাম্ ॥ ৬॥

ছন্দঃ ॥

অয়ি গিরিনংদিনি নংদিতমেদিনি বিশ্ববিনোদিনি নংদনুতে

গিরিবরবিংধ্যশিরোঽধিনিবাসিনি বিষ্ণুবিলাসিনি জিষ্ণুনুতে ।

ভগবতি হে শিতিকণ্ঠকুটুংবিনি ভূরিকুটুংবিনি ভূরিকৃতে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১॥ ॥ ৭॥

সুরবরবর্ষিণি দুর্ধরধর্ষিণি দুর্মুখমর্ষিণি হর্ষরতে

ত্রিভুবনপোষিণি শংকরতোষিণি কিল্বিষমোষিণি ঘোষরতে ।

দনুজনিরোষিণি দিতিসুতরোষিণি দুর্মদশোষিণি সিন্ধুসুতে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ২॥ ॥ ৮॥

অয়ি জগদংব মদংব কদংববনপ্রিয়বাসিনি হাসরতে

শিখরিশিরোমণিতুঙ্গহিমালযশৃংগনিজালযমধ্যগতে ।

মধুমধুরে মধুকৈটভগংজিনি কৈটভভংজিনি রাসরতে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৩॥ ॥ ৯॥

অযি শতখণ্ডবিখণ্ডিতরুণ্ডবিতুণ্ডিতশুণ্ডগজাধিপতে

রিপুগজগণ্ডবিদারণচণ্ডপরাক্রমশুণ্ড মৃগাধিপতে ।

নিজভুজদণ্ডনিপাতিতখণ্ডনিপাতিতমণ্ডভটাধিপতে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৪॥ ॥ ১০॥

অযি রণদুর্মদশত্রুবধোদিতদুর্ধরনির্জরশক্তিভৃতে

চতুরবিচারধুরীণমহাশিবদূতকৃতপ্রমথাধিপতে ।

দুরিতদুরীহদুরাশযদুর্মতিদানবদূতকৃতাংতমতে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৫॥ ॥ ১১॥

অযি শরণাগতবৈরিবধূবরবীরবরাভযদাযকরে

ত্রিভুবনমস্তকশূলবিরোধিশিরোধিকৃতামলশূলকরে ।

দুমিদুমিতামরদুংদুভিনাদমহোমুখরীকৃততিগ্মকরে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৬॥ ॥ ১২॥

অযি নিজহুঁকৃতিমাত্রনিরাকৃতধূম্রবিলোচনধূম্রশতে

সমরবিশোষিতশোণিতবীজসমুদ্ভবশোণিতবীজলতে ।

শিবশিব শুংভনিশুংভমহাহবতর্পিতভূতপিশাচরতে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৭॥ ॥ ১৩॥

ধনুরনুসংগরণক্ষণসংগপরিস্ফুরদংগনটৎকবকে
কনকপিশংগপৃষৎকনিষংগরসদ্ভটশৃংগহতাবটুকে ।
কৃতচতুরঙ্গবলক্ষিতিরঙ্গঘটদ্বহুরঙ্গরটদ্বটুকে
জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৮॥॥ ১৪॥

সুরললনাততথেযিতথেযিতথাভিনযোত্তরনৃত্যরতে
হাসবিলাসহুলাসমযি প্রণতার্তজনেঽমিতপ্রেমভরে ।
ধিমিকিটধিক্কটধিকটধিমিধ্বনিঘোরমৃদংগনিনাদরতে
জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ৯॥ ॥ ১৫॥

জয় জয় জপ্যজযে জযশব্দপরস্তুতিতৎপরবিশ্বনুতে
ঝণঝণঝিঞ্জিমিঝিংকৃতনূপুরসিংজিতমোহিতভূতপতে ।
নটিতনটার্ধনটীনটনাযকনাটিতনাট্যসুগানরতে
জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১০॥ ॥ ১৬॥

অযি সুমনঃসুমনঃ সুমনঃ সুমনঃ সুমনোহরকাংতিযুতে
শ্রিতরজনীরজনীরজনীরজনীরজনীকরবক্ত্রবৃতে ।
সুনযনবিভ্রমরভ্রমরভ্রমরভ্রমরভ্রমরাধিপতে
জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১১॥ ॥ ১৭॥

সহিতমহাহবমল্লমতল্লিকমল্লিতরল্লকমল্লরতে

বিরচিতবল্লিকপল্লিকমল্লিকঝিল্লিকভিল্লিকবর্গবৃতে ।

সিতকৃতফুল্লিসমুল্লসিতারুণতল্লজপল্লবসল্ললিতে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১২॥ ॥ ১৮॥

অবিরলগণ্ডগলন্মদমেদুরমত্তমতঙ্গজরাজপতে

ত্রিভুবনভূষণভূতকলানিধিরূপপযোনিধিরাজসুতে ।

অযি সুদতী জনলালসমানসমোহনমন্মথরাজসুতে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৩॥ ॥ ১৯॥

কমলদলামলকোমলকাংতিকলাকলিতামলভাললতে

সকলবিলাসকলানিলযক্রমকেলিচলৎকলহংসকুলে ।

অলিকুলসঙ্কুলকুবলযমণ্ডলমৌলিমিলদ্বকুলালিকুলে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৪॥ ॥ ২০॥

করমুরলীরববীজিতকূজিতলজ্জিতকোকিলমঞ্জুমতে

মিলিতপুলিন্দমনোহরগুঞ্জিতরন্জিতশৈলনিকুঞ্জনিকুঞ্জগতে ।

নিজগুণভূতমহাশবরীগণসদ্গুণসংভৃতকেলিতলে

জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৫॥ ॥ ২১॥

কটিতটপীতদুকূলবিচিত্রমযূখতিরস্কৃতচংদ্ররুচে

প্রণতসুরাসুরমৌলিমণিস্ফুরদংশুলসন্নখচংদ্ররুচে ।

জিতকনকাচলমৌলিপদোর্জিতনির্ঝরকুংজরকুংভকুচে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৬॥ ॥ ২২॥

বিজিতসহস্রকরৈকসহস্রকরৈকসহস্রকরৈকনুতে

কৃতসুরতারকসঙ্গরতারকসঙ্গরতারকসূনুসুতে ।

সুরথসমাধিসমানসমাধিসমাধিসমাধিসুজাতরতে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৭॥ ॥ ২৩॥

পদকমলং করুণানিলয়ে বরিবস্যতি যোঽনুদিনং স শিবে

অয়ি কমলে কমলানিলয়ে কমলানিলয়ঃ স কথং ন ভবেত্ ।

তব পদমেব পরংপদমেবমনুশীলযতো মম কিং ন শিবে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৮॥ ॥ ২৪॥

কনকলসৎকলসিন্ধুজলৈরনুসিঞ্চিনুতে গুণ রঙ্গভুবং

ভজতি স কিং ন শচীকুচকুংভতটীপরিরংভসুখানুভবম্ ।

তব চরণং শরণং করবাণি নতামরবাণিনিবাসি শিবং

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ১৯॥ ॥ ২৫॥

তব বিমলেন্দুকুলং বদনেন্দুমলং সকলং ননু কূলযতে

কিমু পুরুহূতপুরীন্দুমুখীসুমুখীভিরসৌ বিমুখীক্রিযতে ।

মম তু মতং শিবনামধনে ভবতী কৃপযা কিমুত ক্রিযতে

জয় জয় হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ২০॥ ॥ ২৬॥

অযি মযি দীনদযালুতযা কৃপযৈব ত্বযা ভবিতব্যমুমে
অযি জগতো জননী কৃপযাসি যথাসি তথাঽনুমিতাসি রতে ।
যদুচিতমত্র ভবত্যুররিকুরুতাদুরুতাপমপাকুরুতে
জয জয হে মহিষাসুরমর্দিনি রম্যকপর্দিনি শৈলসুতে ॥ ২১॥ ॥ ২৭॥

স্তুতিমিতস্তিমিতঃ সুসমাধিনা নিযমতোঽযমতোঽনুদিনং পঠেৎ ।
পরমযা রমযাপি নিষেব্যতে পরিজনোঽরিজনোঽপি চ তং ভজেৎ ॥ ২৮॥

রমযতি কিল কর্ষস্তেষু চিত্তং নরাণামবরজবরযস্মাদ্রামকৃষ্ণঃ কবীনাম্ ।
অকৃত সুকৃতিগম্যং রম্যপদ্যৈকহর্ম্যং স্তবনমবনহেতুং প্রীতযে বিশ্বমাতুঃ ॥ ২৯॥

ইন্দুরম্যো মুহুর্বিন্দুরম্যো মুহুর্বিন্দুরম্যো যতঃ সাঽনবদ্যং স্মৃতঃ ।
শ্রীপতেঃ সূনূনা কারিতো যোঽধুনা বিশ্বমাতুঃ পদে পদ্যপুষ্পাঞ্জলিঃ ॥ ৩০॥

ইতি শ্রীভগবতীপদ্যপুষ্পাঞ্জলিস্তোত্রম্ সম্পূর্ণম্॥

The inner numbering of 1 through 21, between 7 and 27 suggests the popular mahiShasuramardini stotra.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Bhagwati Padya Pushpanjali Stotram Lyrics in Bengali PDF
% File name : mahisha.itx
% Location : doc_devii
% Author : raamakRiShNa kavii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Originally A.Hudli also by G. Ramkumar ramkumar at cs.stanford.edu
% Proofread by : Sunder hattangadi sunderh at hotmail.com
% Latest update : October 29, 2002, May 24, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website